स्तूष्णो विशदस्त्वोदनो लघुः। अधौतोऽप्रस्रुतोऽस्विन्नः शीतश्चाप्योदनो गुरुः। लघुः सुगन्धिः कफहा विज्ञेयो भृष्टतण्डुलः। स्नेहैर्मांसैः फलैः कन्दैर्वैदलाम्लैश्च संयुताः। गुरवो वृंहणा बल्या ये च क्षीरोपसाधिताः। सुस्विन्नो निस्तुषो भृष्ट ईषत्सूपो लघुर्हितः। स्विन्नं निःपीडितं शाकं हितं स्यात् स्नेहसंस्कृतम्। अस्विन्नं स्नेहरहितमपीड़ितमतोऽन्यथा। मांसं स्वभावतो वृष्यं स्नेहनं बलवर्द्धनम्। स्नेहगोरसधान्याम्लफलाम्लकटुकैः सह। सिद्धं मांसं हितं बल्यं रोचनं वृंहणं गुरु। तदेव गोरसादानं सुरभिद्रव्यसंस्कृतम्। विद्यात् पित्तकफोद्रेकि बलमांसाग्निवर्द्धनम्। परिशुष्कं स्थिरं स्निग्धं हर्षणं प्रीणनं गुरु। रोचनं बलमेधाग्निमांसौजःशुक्रवर्द्धनम्। तदेवोल्लुप्तपिष्टत्वादुल्लुप्तमिति पाचकाः। परिशुष्कगुणैर्युक्तं वह्नेः पक्वमतो लघु। तदेव शूलिकाप्रोतमङ्गारे परिपाचितम्। ज्ञेयं गुरुतरं किञ्चित् प्रदिग्धं गुरुपाकतः। उल्लुप्तं भर्जितं पिष्टं प्रतप्तं कन्दुपाचितम्। परिशुष्कं प्रदग्धञ्च शूल्यं यच्चान्यदीदृशम्। मांसं यत्तैलसिद्धन्तु वीर्य्योष्णं पित्तकृद्गुरु। लघ्वग्निदीपनं हृद्यं रुच्यं दृष्टिप्रसादनम्। अनुष्णवीर्य्यं पित्तघ्नं मनोज्ञं घृतसाधितम्। प्रीणनः प्राणजननः श्वासकासक्षयापहः। वातपित्तश्रमहरो हृद्यो मांसरसः स्मृतः। स्मृत्योजःस्वरहीनानां ज्वरक्षीणक्षतोरसाम्। भग्नविश्लिष्टसन्धीनां कृशानामल्परेतसाम्। आप्यायनः संहननः शुक्रौजोबलवर्द्धनः। सदाडिमयुतो वृष्यः संस्कृतो दोषनाशनः। यन्मांसमुद्धृतरसं न तत्पुष्टिबलावहम्। विष्टम्भि दुर्जरं रूक्षं विरसं मारुतावहम्। दीप्ताग्नीनां सदा पथ्यः खानिकस्तु परं गुरुः। मांसं निरस्थि सुस्विन्नं पुनर्दृषदि चूर्णितम्। पिप्पलीशुण्ठिमरिचगुडसर्पिःसमन्वितम्। एकध्यं पाचयेत्सम्यक् वेशवार इति स्मृतः। वेशवारो गुरुः स्निग्धो बल्यो वातरुजापहः। प्रीणनः सर्वधातूनां विशेषान्मुखशोषिणाम्। क्षुत्तृट्तापहरः श्रेष्ठः सौरावः स्वादुशीतलः। कफघ्नो दीपनो हृद्यः शुद्धानां प्राणिनामपि। ज्ञेयः पथ्यतमश्चापि मुद्गयूषः कृताकृतः। स तु दाडिममृद्वीकायुक्तः स्याद्रागषाडवः। रुचिष्यो लघुपाकश्च दोषाणामविरोधकृत्। मसूरमुद्गगोधूमकुलत्थलवणैः कृतः। कफपित्ताविरोधी स्याद्वातव्याधौ च युज्यते। मृद्वीकादाडिमैर्युक्तः स एवोक्तोऽनिलार्दिते। रोचनो दीपनो हृद्यो लघुपाकउपदिश्यते। पटोलनिम्बयूषौ तु कफमेदोविशोषिणौ। पित्तघ्नौ दीपनौ हृद्यौ कृमिकुष्ठज्वरापहौ। श्वासकासप्रतिश्यायप्रसेकारोचकज्वरान्। हन्ति मूलकयूषस्तु कफमेदोगलामयान्। कुलत्थयूषोऽनिलहा श्वासपीनसनाशनः। तूणीप्रतूणीकासार्शोगुल्मोदावर्त्तनाशनः। दाडिमामलकैर्यूषो हृद्यः संशमनो लघुः। प्राणाग्निजननो मूर्च्छामेदोघ्नः पित्तवातजित्। मुद्गामलकयूषस्तु ग्राही पित्तकफे हितः। यवकोलकुलत्थानां यूषः कण्ठ्योऽनिलापहः। सर्व्वधान्यकृतस्तद्वद्वृंहणः प्राणवर्द्धनः। खलकाम्बलिकौ हृद्यौ तथा वातकफे हितौ। बल्यः कफानिलौ हन्ति दाडिमाम्लोऽग्निदीपनः। दध्यम्लः कफकृद्बल्यः स्निग्धो वातहरो गुरुः। तक्राम्लपित्तकृत् प्रोक्तो विषरक्तप्रदूषणः। खडाः खडयवाग्वश्च षाडवाः पानकानि च। एवमादीनि चान्यानि क्रियन्ते वैद्यवाक्यतः। अस्नेहलवणं सर्व्वमकृतं कटुकैर्विना। विज्ञेयं लवणस्नेहकटुकैर्हि युतं कृतम्। अथ गोरसधान्याम्लफलाम्लैरन्वितञ्च यत्। यथोत्तरं लघु हितं संस्कृतासंस्कृतं रसे। दधिमस्त्वम्लसिद्धस्तु यूषः काम्बलिकः स्मृतः। तिलपिन्याकविकृतिः शुष्कशाकं विरूढकम्। सिण्डाकी च गुरूणि स्युः कफपित्तकराणि च। तद्वच्च वटकान्याशुर्विदाहीनि गुरूणि च। लघवो वृंहणा वृष्या हृद्या रोचनदीपनाः। तृष्णामूर्च्छाभ्रमच्छर्दिश्रमघ्ना रागषाडवाः। रसाला वृंहणी बल्या स्निग्धा वृष्या च रोचनी। स्नेहनं गुडसंयुक्तं हृद्यं दध्यनिलापहम्। सक्तवः सर्पिषाभ्यक्ताः शीतवारिपरिप्लुताः। नातिद्रवा नातिसान्द्रा मन्थ इत्युपदिश्यते। मन्थः सद्योबलकरः पिपासाश्रमनाशनः। साम्लस्नेहगुडो मूत्रकृच्छ्रोदावर्त्तनाशनः। शर्करेक्षुरसद्राक्षायुक्तः पित्तविकारनुत्। द्राक्षामधूकसंयुक्तः कफरोगनिवर्हणः। वर्गत्रयेणोपहितो मलदोषानुलोमनः। गौडमम्लमनम्लं वा पानकं गुरु मूत्रलम्। तदेव खण्डमृद्वीकाशर्करासहितं पुनः। साम्लं सुतीक्ष्णं सुहिमं पानकं स्यान्निरत्ययम्। माद्वीकं तु श्रमहरं मूर्च्छादाहतृषापहम्। परूषकाणां कोलानां हृद्यं विष्टम्भि पानकम्। द्रव्यसंयोगसंस्कारं ज्ञात्वा मात्राञ्च सर्वतः। पानकानां यथायोगं गुरुलाघवमादिशेत्”।

२। कृतं साधितमन्नं येन। साधितान्ने पाचके त्रि॰

कृताय पुं॰ कृतसंज्ञकोऽयः। द्यूतक्रीड़ाप्रसिद्धे चतुरङ्कान्वित